राजेन्द्र ! भविष्यन्ति महामते ! । तथाऽस्त्विति ततो राजा कुरुः शक्रमुवाच ह । ततस्तमभ्यनुज्ञाप्य प्रहृष्टेनान्तरात्मना । जगाम त्रिदिवं भूयः क्षिप्रं बलनिसूदनः । एवमेतद्यदुश्रेष्ठ ! कृष्टं राजर्षिणा पुरा । शक्रेण चाभ्यनुज्ञातं ब्रह्माद्यैश्च सुरैस्तथा । नातः परतरं पुण्यं भूमेः स्थानं भविष्यति । इह तप्स्यन्ति ये केचित् तपः परमकं नराः । देहत्यागेन ते सर्वे यास्यन्ति ब्रह्मणः क्षयम् । ये पुनः पुण्यभाजो वै दानं दास्यन्ति मानवाः । तेषां सहस्रगुणितं भविष्यत्यचिरेण वै । ये चेह नित्यं मनुजा निवत्स्यन्ति शुभैषिणः । यमस्य विषयं ते तु न द्रक्ष्यन्ति कदाचन । यक्ष्यन्ति ये च क्रतुभिर्महद्भिर्मनुजेश्वराः । तेषां त्रिविष्टपे वासो यावद्भूमिर्धरिष्यति । अपि चात्र स्वयं शक्रो जगौ गाथां सुराधिपः । कुरुक्षेत्रनिबद्धां वै तां शृणुष्व हलायुध ! । पांशवोऽपि कुरुक्षेत्राद्वायुना समुदीरिताः । अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् । सुरर्षभा ब्राह्मणसत्तमाश्च तथा नृगाद्या नरदेवमुख्याः । इष्ट्वा महार्हैः क्रतुभिर्नृसिंह ! संत्यज्य देहान् सुगतिं प्रपन्नाः । तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानान्तु मचक्रकस्य । एतत् कुरुक्षेत्रसमन्तपञ्चकं प्रजापतेरुत्तरवेदिरुच्यते । शिवं महापुण्यमिदं दिवौकसां सुसंमतं सर्वगुणैः समन्वितम् । अतश्च सर्वे निहता नृपा रणे यास्यन्ति पुण्यां गतिमक्षयां सदा । इत्युवाच स्वयं शक्रः सह ब्रह्मादिभिस्तथा । तच्चानुमोदितं सर्वं ब्रह्मविष्णुमहेश्वरैः ।

“कुरुक्षेत्रे परीणहि स्थलेऽप्यग्न्याधेयमन्वारम्भणीयान्तं भवति” कात्या० २४।६।२४।

कुरुक्षेत्रं च ब्रह्मर्षिदेशः ।“कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः” मनूक्तेः । इदं संवरणसुतकुरुनृपराज्यान्तर्गतमत स्तन्नाम्ना प्रथितम् अतएव कुरुशब्ददर्शिते भाग०वाक्ये “कुरुक्षेत्रपतिं कुरुमित्युक्तम् । भा० आ०९४अ० । “ततः संवरणाद्देवी तपती सुषुवे कुरुम् । राजत्वे तं प्रजाः सर्वा धर्म्मज्ञ इति मेनिरे । तस्य नाम्नाऽभि विख्यातं पृथिव्यां कुरुजाङ्गलम् । कुरुक्षेत्रं च तपसा पुण्यं चक्रे महातपाः” इति ।

कुरुक्षेत्रस्थतीर्थमहात्म्यं भा०व०८३अ० उक्तं यथा “ततो गच्छेत राजेन्द्र ! कुरुक्षेत्रमभिष्टुतम् । पापेभ्यो यत्र मुच्यन्ते दर्शनात् सर्वजन्तवः । कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् । य एवं सततं ब्रूयात् सोऽपि पापैः प्रमुच्यते । पांशवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः । अपि दुष्कृतकर्म्माणं नयन्ति परमां गतिम् । दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च । ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे । तत्र मासं वसेद्वीर ! सरस्वत्यां युधिष्ठिर ! । यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः । गन्धर्व्वाप्सरसो यक्षाः पन्नगाश्च महीपते ! । ब्रह्मक्षेत्रं महापुण्यमभिगच्छन्ति भारत ! । मनसाप्यभिकामस्य कुरुक्षेत्रं युधिष्ठिर ! । पापानि विप्रणश्यन्ति ब्रह्मलोकञ्च गच्छति । गत्वा हि श्रद्धया युक्तः कुरुक्षेत्रं कुरूद्वह ! । फलं प्राप्नोति च तदा राजसूयाश्वमेधयोः । ततो मङ्कणकं नाम द्वारपालं महाबलम् । यक्षं समभिवाद्यैव गोसहस्रफलं लभेत् । ततो गच्छेत धर्म्मज्ञो विष्णोः स्थानमनुत्तमम् । सततं नाम राजेन्द्र ! यत्र सन्निहितो हरिः । तत्र स्नात्वा च नत्वा च त्रिलोकप्रभवं हरिम् । अश्वमेधमवाप्नोति विष्णुलोकञ्च गच्छति । ततः परिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् । अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत ! । पृथिवीतीर्थमासाद्य गोसहस्रफलं लभेत् । ततः शालूकिनीं गत्वा तीर्थसेवी नराधिप ! । दशाश्वमेधे स्नात्वा च तदेव फलमाप्नुयात् । सर्पदेवीं समासाद्य नागानां तीर्थमुत्तमम् । अग्निष्टोममवाप्नोति नागलोकञ्च विन्दति । ततो गच्छेत धर्म्मज्ञो द्वारपालं तरन्तुकम् । तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत् । ततः पञ्चनदं गत्वा नियतो नियताशनः । कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत् । अश्विनोस्तीर्थमासाद्य रूपवानभिजायते । ततो गच्छेत धर्म्मज्ञो वाराहं तीर्थमुत्तमम् । विष्णुर्वाराहरूपेण पूर्वं यत्र स्थितोऽभवत् । तत्र स्नात्वा नरश्रेष्ठ ! अग्निष्टोमफलं लभेत् । ततो जयन्त्यां राजेन्द्र सोमतीर्थं समाविशेत् । स्नात्वा फलमवाप्नोति राजसूयस्य मानवः । एकहंसे नरः स्नात्वा गोसहस्रफलं लभेत् । कृतशौचं समासाद्य तीर्थसेवी नराधिप । पुण्डरीकमवाप्नोति कृतशौचो भवेच्च सः । ततो मुञ्जवटं नाम स्थाणोः स्थानं महात्मनः । उपोष्य रजनीमेकां गाणपत्यमवाप्नुयात् । तत्रैव च महाराज ! यक्षिणीं लोकविश्रुताम् । स्नात्वाभिगम्य राजेन्द्र ! सर्व्वान् कामानवाप्नुयात् । कुरुक्षेत्रस्य तद्द्वारं विश्रुतं भरतर्षभ ! । प्रदक्षिणमुपावृत्य तीर्थसेवी समाहितः । सम्मितं पुष्कराणाञ्च स्नात्वार्च्चय पितृदेवताः । जामदग्न्येन रा-